International Journal of Sanskrit Research 2024; 10(3): 192-197

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(3): 192-197
© 2024 IJSR
www.anantaajournal.com
Received: 23-04-2024
Accepted: 27-05-2024

**श्रीश समीर के एस्**
शोधच्छात्रः, केन्द्रिय संस्कृत विश्वविद्यालयः, देहली, भारत

Corresponding Author:
**श्रीश समीर के एस्**
शोधच्छात्रः, केन्द्रिय संस्कृत विश्वविद्यालयः, देहली, भारत

# ईमानुयेल् काण्ट् महोदयस्य कर्मविज्ञानात्मिकायाः मूल्यमीमांसायाः - भगवद्गीतायाः कर्मसिद्धान्तेन साकं तुलनात्मकाध्ययनम्

**श्रीश समीर के एस्**

**सारांशः**

काण्ट् महोदयस्य कर्मविज्ञानं पाश्चात्यमूल्यमीमांसायाः प्रमुखसिद्धान्तत्त्वेन स्वीक्रीयते। तथैव भगवद्गीतायास्तु भारतीयज्ञानपरम्परायाः प्रमुखस्रोतत्वेन स्वीकृतिः अस्ति। अत्र साक्षात् भगवद्गीतायाः तृतीये, चतुर्थे, पञ्चमे च अध्याये कर्मसिद्धान्तस्य विस्तृतरूपेण प्रतिपादनं दृश्यते। अत्र क्रमेण उभयोः नैतिकमतयोः परिचयं, कर्माचरणप्रक्रियायाः, स्वतन्त्रतायाः सम्प्रत्ययान्, आज्ञापनप्रकारान्, मूल्यपरम्परायाः, पारलौकिकांशानां, कर्म एव सिद्धान्तत्त्वेन परिगणनानि, उत्तमाशयाणां परिचिन्तनानि च क्रमशः निरूपितानि सन्ति। भगवद्गीतायाः मते एतदतिरिच्यापि बहूनि तत्त्वानि सन्ति। काण्ट् महोदयस्य कर्मविज्ञानं सीमितमस्ति इत्यतः तेन प्रतिपादितानाम् अंशानामेव परिगणनम् अनुसन्धाने क्रियते। एतान् अंशान् भगवद्गीतायाः सन्दर्भे समीक्ष्य काः समानताः के भेदाश्च सन्तीति अत्र प्रतिपाद्यते। सर्वत्र स्वीकृतांशेषु समानताः भेदाश्च प्राप्ताः यथा द्वयमपि दर्शनमस्ति एव परन्तु एकं तु पाश्चात्याधुनिकमतमस्ति अन्यत् पारम्परिकादर्शवादत्वेन दृश्यते। कर्मणः उभयत्र प्रसक्तिः वर्तते परन्त्वपि एकत्र शुद्धतर्केनेन मूल्यानां निर्धारणं भवति अन्यत्र तु आदर्शानाम् अनुपालनेन भवति। काण्ट् महोदयः आज्ञापनान् सामाजिकवर्गेषु विभजनं करोति अन्यत्र गीतायाम् आदर्शात्मकवाक्याः प्राक्कल्पितस्वरूपेण आज्ञापनान् विधास्यति। उभयत्र पारलौकिकतत्वानां परिचर्चा लभ्यते परन्तु काण्ट् मते पारलौकिकतत्वानां परिगणनेन सिद्धान्ते मतभेदानां सम्भाव्यता वर्धते। काण्ट् मते कर्मणः सम्प्रत्ययः तर्कनादि संज्ञानानां प्रयोगेण वैज्ञानिकरूपेण तिष्ठति। भगवद्गीतायाः विचाराणि बहुविस्तृतं गहनञ्च अस्ति तथैव एके एव परिक्षेपे गीतायाः परिगणनं कर्तुं न शक्यते। अतः अन्ततो गत्वा सामन्यतया तुलनाद्वारा उभयोः विचारधारयोः मध्ये विद्यमानानाम् समानांशानां विभेदानाञ्च ज्ञानेन बहुविषयकोपागमत्वेन दर्शनानाम् अवगमने साहाय्यता भवत्विति इदमनुसन्धानं विहितमस्ति। अनुसन्धानस्य निष्कर्षे कापि निर्धारकावधारणा न लभ्यते। अत्र तुलनायाः उद्देश्यं विशेषतया दार्शनिकांशानां गहनाध्ययनार्थमेव निर्देशितमस्ति। किमधिकं महत्त्वपूर्णं? किं सत्यम्? किं समीचीनम्? किं पालनीयम्? इत्यादि प्रश्नानां समाधानमत्र न विवक्षितमस्ति। अतः उभयत्र विद्यमानानां विशिष्टांशानां धनात्मकरूपेण ग्रहणार्थम् अनुसन्धानमिदं कृतमस्ति।

**कूटशब्दः** कर्मविज्ञानम्, इमानुयेल् काण्ट्, मूल्यमीमांसा, भगवद्गीता, तुलनात्मकाध्ययनम्, कर्मसिद्धान्तः

## प्रस्तावना

दृश्यते अनेन जगतः सारः दर्शनम् इति सुष्ठु उक्तम्। पौर्विकमतेषु भारतस्य मतं प्रमुखमस्ति यदा पाश्चात्येषु बहवः विविधकालघट्टेषु स्वमतानि प्रतिपादितवन्तः।

पाश्चात्यमतदर्शिनः स्वसिद्धान्तान् ज्ञानमीमांसा, मूल्यमीमांसा, तत्त्वमीमांसा इत्यादि प्रमुखांशेषु विभज्य प्रस्तुवन्ति। भारतीयेषु दर्शनेषु पृथक्तया एवं विभागस्तु नास्ति परन्तु बहुषु विभिन्नायामेषु अध्ययनं तु विहितमस्त्येव। पाश्चात्येषु मूल्यमीमांसायाः प्रतिपादने Aristotle, Epicurous, Immanuel Kant, Thomas Aquinous इत्यादायाः स्वयोगदानं दत्तवन्तः। साररूपेण पश्यामश्चेत् अत्र विभागद्वयम् सामान्येन परिगणयितुं शक्यते तदस्ति वस्तुनिष्ठसिद्धान्ताः व्यक्तिनिष्ठसिद्धान्ताश्च। वस्तुनिष्ठसिद्धान्ताः निर्दिष्टलक्ष्यमुद्दिश्य व्यक्तेः तत्र स्वीकृतिं दर्शयन्ति अन्यत्र व्यक्तिनिष्ठसिद्धान्ताः लक्ष्यापेक्षया व्यक्तेः आवश्यकातानामाधरेण चिन्तनान् विधास्यन्ति। ईमानुयेल् काण्ट् महोदयस्य सिद्धान्तमत्र विभिन्नमस्ति सम्प्रदायद्वयमपि विहाय सामाजिकव्यक्तिनिष्ठताम् अङ्गीकृतवन्तः यस्यार्थः अस्ति यत् व्यक्तेः स्वपरिवेषे एका सामाजिकता वर्तते यत्र उचितकर्मणाम् सम्यगनुपालनेन सर्वैरङ्गीकृतस्य मूल्यस्य प्राप्तिः भवति। एवं रूपेण स्वमूल्यमीमांसायाः मतं प्रस्तौतुं काण्ट् महोदयः कर्मविज्ञानं प्रतिपादयति।

अन्यत्र भारतीयदर्शनेषु विस्तृतरूपेण मूल्यमीमांसायाः परिचर्चा सर्वेषु दर्शनेषु लभ्यते एव। भारतीयदर्शनाः एव न अन्यधर्मशास्त्रग्रन्थाः तत्र नीतयः यथा कौटिल्यराजनीतिः, विदुरनीतिः, शुक्रनीतिः तथैव स्मृतिग्रन्थाः पराशरस्मृतिः, मनुस्मृतिः इत्यादयः अपि स्वकालानुगुणं नीतीनां मूल्यानां वा प्रतिपादनं कुर्वन्ति। भारतीयज्ञानपरम्परायाः विस्तारस्य मूलमस्ति वेदाः, ब्राह्मणाः, आरण्यकाः, उपनिषत्ग्रन्थाश्च। भारतीयेतिहासाः इति प्रसिद्धाः ग्रन्थाः यथा रामायणं, महाभारतमित्यादयः उदाहरणैस्साकं श्रेष्ठजीवनमूल्यानां स्रोतः वर्तते। तत्रापि महाभारते प्रसिद्धभागः अस्ति गीतोपदेशः यत् जीवनस्य सारमेव प्रतिपादयति। तत्र अर्जुनविषादयोगतः मोक्षसंन्यासयोगपर्यन्तं अष्टादशाध्यायाः सन्ति। तत्र 'कर्मयोगः' इति नामके तृतीयाध्याये विशेषेण कर्मसिद्धान्तानां प्रतिपादनं दृश्यते। तत्साकं चतुर्थे पञ्चमे च अध्यायेऽपि कर्मसम्बन्धितानाम् अंशानां यथा कर्ममार्गधर्ममार्गयोः मध्ये कः श्रेष्ठः मार्गः इति चतुर्थाध्याये तथैव पञ्चमाध्याये कर्मणः बन्धनात् मानवानां मुक्तिः कथमित्यपि विस्तारेण उपदिष्टमस्ति। अस्य कर्मयोगस्य एवं पूर्वोक्तस्य कर्मविज्ञानस्य च परस्परं समानतानां भेदानाञ्च अवगमनमेव अस्यानुसन्धानस्य उद्देश्यमस्ति।

## अनुसन्धानप्रविधिः (Methodology)

अत्रानुसन्धानस्य प्रविधिः वर्णनात्मकं तुलनात्मकञ्च अनुसन्धानम् अस्ति। अत्र प्रक्रियासु चराणां गणनं न क्रियते इत्यतः वर्णनात्मकमस्ति। अत्र प्रमुखांशौ द्वौ स्तः काण्ट् कर्मविज्ञानं भगवद्गीतायाः कर्मयोगश्च अतः एतदनुसन्धानं तुलनात्मकञ्च अस्ति। अत्र प्रक्रियाः एवं निरूप्यन्ते –

- तुलनायाः चराणां प्रतिपादनम्।
- तुलनार्थं मूलभूततत्वानां निश्चयनम्।
- सम्बद्धांशानाम् आधारेण प्रतिवेदनायाः निर्माणम्।
- प्रत्येकांशस्य सम्बन्धकल्पनं निष्कर्षप्राप्तिश्च।

## परिचर्चा (Discussion)

Immaneul Kant इति नामकः जर्मन् देशीयः दार्शनिकः 17 तमे शतके स्वसिद्धान्तान् 'Critique of Pure Reason' नामके पुस्तके प्रतिपादितवान्। Newton इत्यनेन कृतैः वैज्ञानिकविकसनैः प्रभावितः एषः धर्मस्य राजनीतेः वा प्रभावात् जन्यमानानां पारम्परिकमूल्यस्रोतसां तिरस्कारं कृत्वा तर्कनमेव मुल्यानां निर्माणे आधारः अस्तीति घोषयति। एतस्य मूल्यसिद्धान्ते विमर्शात्मकरूपेण चिन्तयितुं सर्वेभ्यः अवसरः अस्ति। नैतिकसिद्धान्ते काण्ट् महोदयः 'वर्गीय-आज्ञापनम्' 'Categorical Imperative' इत्यंशं प्रतिपादयति यस्य उपपादनमस्ति यत् अस्माभिः कर्तव्याणि कार्याणि सन्ति तस्य फलं लभ्यते इति किमपि लक्ष्यमस्ति इति वा विचिन्त्य न प्रवर्तितव्यम्, तदतिरिच्य फलं प्राप्तुम् अपेक्षितयोग्यतासम्पादने चिन्तनीयमिति। अत्र कर्तव्यकार्यस्य निश्चयस्तु संज्ञानपूर्णतर्कनेन सिद्ध्यति इति काण्ट् महोदयस्य मतमस्ति।

महर्षिव्यासरचितस्य महाभारतग्रन्थस्य भीष्मपर्वणः अङ्गभूतत्वेन विद्यमानायाः कृष्णार्जुनसंवादरूपकस्याः भगवद्गीतयाः वैशिष्ट्यम् अतुलनीयमस्ति। अत्र विस्तृतपरिक्षेपे आध्यात्मिकविषयांशानां, मौलिकद्वन्द्वानां, दार्शनिकविचारधाराणाञ्च प्रस्तुतिः भवति। भगवद्गीतायाम् अष्टादशाध्यायाः सन्ति यत्र कर्मसिद्धान्तस्य विषये पृथक्त्वेन तृतीये चतुर्थे पञ्चमे च अध्याये प्रस्तुतिः दृश्यते, येषां क्रमशः नाम कर्मयोगः, ज्ञानकर्मसंन्यासयोगः, कर्मसंन्यासयोगश्च अस्ति,

प्रत्येकस्मिन् क्रमशः 43, 42, 29 च संख्याकाः श्लोकाः सन्ति। भगवतः कृष्णस्य वचनानुसारं, सम्पूर्णविश्वस्य सर्वे जीवराशयः भगवतः संरचनायाम् एव अन्तर्भवन्ति, येषां जीवने केचन भूमिकाः कानिचन उत्तरदायित्वानि च भवन्ति। सत्वरजस्तमैः गुणैः भूषिताः सर्वे मानवाः गुणकर्मविभागतः ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः इति चतुर्धा विभक्ताः सन्ति, येषां जीवने ब्रह्मचर्यं, गार्हस्थ्यं, वानप्रस्थं, संन्यासश्चेति चतस्रः अवस्थाः भवन्ति, प्रत्येकावस्थानां परिगणनानाम् अनुसारं मानवः धर्मार्थकाममोक्षाख्यानां चतुर्णां पुरुषार्थानां सिद्ध्यर्थं कर्मणां परिपालनेन जीवनं यापयेदिति निरूपितमस्ति। अत्र कुत्रापि पूर्वनिर्धारितलक्ष्यानां परिगणना न दृश्यते। अतः एव कर्मसंन्यासयोगे भगवान् स्पष्टीकरोति यत् कर्मापेक्षया विना धर्ममाचरेदिति।

अत्र तुलनायाः प्रारम्भे संशयमेकं उत्पद्यते यत् भगवद्गीतायाः काले परम्परागतानां राजतन्त्राणां शासनमासीत् परन्तु १६ शतमानस्य अनन्तरं क्रमेण विश्वे स्वतन्त्रमूल्यानां, वैज्ञानिकतायाः, प्रजातन्त्रस्य च प्रतीतिरभवत्, तर्हि कथमत्र तुलना सम्भवति इति? प्रजातन्त्रस्य राजतन्त्रस्य च मूलभूतसमानमूल्याणां ज्ञानेन अस्य संशयस्य निवारणं भवति। यतोऽहि राजतन्त्रो वा भवतु प्रजातन्त्रो वा, तन्त्रस्य सञ्चालकास्तु भवन्ति एव। सञ्चलनदायित्वम् एकत्र राज्ञः आसीत् अन्यत्र प्रजानामेव अभवत् इत्येव भेदः अस्ति। अनेन भगवद्गीतायाः प्रासङ्गिकतायाः वर्धनमेव अभवत्। यत् राज्ञा ज्ञातव्यमासीत् इदानीं सर्वाभिः प्रजाभिः ज्ञात्वा परिपालनीयमस्ति नोचेत् प्रजातन्त्रम् अतन्त्रं भवति। उभौ अपि कर्मयोगः काण्ट् कर्मविज्ञानञ्च मूल्यानां निर्धारणे राज्ञः प्रजानां वा कर्तव्यबोधस्यैव प्रतिपुष्टिं कुर्वन्ति।

**कर्माचरणम्** - प्रत्येकमानवः समाजे जीवितुं कर्माणि आचरति एव। भगवद्गीतायां तृतीयाध्यायस्य पञ्चमश्लोके उक्तमस्ति यत् –

न हि कश्चिद् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥

विना कर्म तु कोऽपि न तिष्ठति, अतः कर्मणः आचरणे किम् आचरणीयम्? कथम् आचरणीयम्? मूल्यं किमस्ति? इति च काण्ट् महोदयः प्रतिपादयति। समाजे जीवन् व्यक्तिः प्रत्येकपरिस्थितौ कर्माचरणार्थं निर्णयान् स्वीकरोति। निर्णयाः व्यक्तिशः पृथगेव भवन्ति, परन्तु निर्णयस्वीकरणे यथा अन्यपाश्चात्याः Epicurous, Aquinous इत्यादयः सुखमूलं प्रदर्शितवन्तः, तद्व्यतिरेकेन काण्ट् महोदयः स्वबुद्धेः विकसनं कृत्वा समञ्जसरूपेण तर्कनेन योग्यनिर्णयानां स्वीकरणं भवेत् तथैव अनेन मुल्यानां सामाजिकाङ्गीकारश्च भवतीति प्रतिपादयति। तर्हि किम् आचरणीयमित्यत्र स्पष्टमस्ति यत् यत् तर्कैः संज्ञानैश्च अङ्गीकृतं भवति तदेव आचरणीयमिति। कथम् आचर्णीयमित्यत्रापि उक्तमस्ति यत् योग्यरूपेण तर्कनेन इति, एवं तर्कितुं मूलमस्ति व्यक्तेः सामाजिकस्तरे संज्ञानम्। भगवद्गीतायामपि इन्द्रियाणां प्रभावतः जायमानानां लोभानां नियन्त्रणं प्राप्य कर्म आचरणीयमिति तृतीयाध्याये सप्तमे श्लोके उधृतमस्ति –

यस्त्विन्द्रियाणि मनसा नियम्याऽरभतेऽर्जुन।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते॥

कथं कर्म आचरणीयमिति तु स्पष्टमभवत् यत् इन्द्रियाणां संयमनं कृत्वा कर्मोपरि चिन्तनं भवेदिति। किमाचरणीयमित्यत्र श्लोकमस्ति यत् किं करणीयं किं न करणीयमिति विदुषः अपि अत्र भ्रान्ताः भवन्ति। अत्र स्पष्टतया इदमेव आचरणीयमिति नास्ति परन्तु बहुत्र ‘पूर्वैरपि मुमुक्षुभिः कृतम्’, ‘कर्मणैव हि संसिद्धिमास्थिता जनकादयः’ इत्यादि प्रयोगैः ज्ञायते यत् सर्वैः करणीयं कर्म उत्तरदायित्वरूपेण पूर्वमेव निश्चितमस्ति। कर्मणः मौलिकतावर्धने अकर्मणः रक्षणे च जनकादिभिः मुमुक्षुभिश्च अनुसृतस्य उदाहरणात्मकमार्गस्य पालनं तादृशपरिस्थितिषु कर्त्तव्यमिति ज्ञायते।

**स्वातन्त्र्यम्** – काण्ट् महोदयः स्वातन्त्र्यमूल्यस्य प्रतिपादने अन्यपाश्चात्यचिन्तकानां मनोवैज्ञानिकत्वेन स्वतन्त्रताचिन्तनं तिरस्कृत्य व्यक्तेः मनसि उद्भूतस्यैव आवश्यकतानां सामजिकत्वेन अङ्गीकारं प्राप्य यत् व्यक्तं भवति तदेव स्वातन्त्र्यमिति वदति। स्वातन्त्र्यस्य लक्षणानि काण्ट् प्रतिपादयति यथा – स्वतन्त्रं भवेत्, स्वातन्त्र्यमस्तीति ज्ञानं भवेत् तथैव मूल्याधारेण मूल्याङ्कनं भवेच्च। भारतीयदर्शनानां मते मोक्षप्राप्तिपर्यन्तं जीवः कदापि स्वतन्त्रः न

भवति, परन्तु जीवनरूपकबन्धनात् मुक्तिः एव स्वातन्त्र्यमिति भणितमत्र। कर्मणां बन्धनमेव अस्वातन्त्र्यमस्ति अत्र भगवद्गीतायां चतुर्थाध्याये एकचत्वारिंशः श्लोकः अस्ति –

योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम्।

आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय॥

अत्र आध्यात्मिकरूपेण स्वातन्त्र्यं चिन्तितं वर्तते, परन्तु काण्ट् महोदयस्तु सामन्यरूपेण समाजे स्वातन्त्र्यस्य स्वरूपं निरूपितवन्तः।

**वर्गीय-आज्ञापनम्** (Categorical Imperative)

वर्गीयाज्ञापनमित्येतत् प्राक्कल्पिताज्ञापनस्य विरोधे काण्ट् महोदयेन उपस्थापितमस्ति। पाश्चात्यदर्शने आदर्शवादिनः बाहुल्येण उच्चजीवनशैलीम् अवाप्तुं नीतीनां नियमानाञ्च परिगणनं कृतवन्तः। नीतीनां वस्तुनिष्ठताधारेण संरचनमभवत् इत्यतः प्रत्येकस्य वैविध्यपूर्णजीवने तेषां सामाजिकतायां व्यवहारे च तस्य अनुमोदनं क्लेशकरम् अभवत्, अतः काण्ट् महोदयः प्रतिपादयति यत् आज्ञापनानि वर्गानुसारं अथवा व्यक्तेः सामाजिकतायाः अनुसारं निगदितं भवेत् न तु समग्रतया इति। अत्र सूत्रत्रयं प्रतिपदयति यथा –

- **वैश्वीकरणनियमावलीनां सूत्रम्** – प्रत्येकक्रियाचरणे क्रियाणां चयने च मनसि इदं प्रमुखतया स्थापनीयं यदिदं चितं कार्यं वैश्विकरूपेण अङ्गीकृतं भवतीति।
- **अन्तिमलक्ष्यत्वेन मानवतायाः सूत्रम्** – यथा स्वस्य संवेगानां परिगणने मानविकमूल्यानि प्रसरितानि भवन्ति तथैव स्वसमाजे अन्येषां प्रति अपि मानविकदृक्कोणम् अपेक्षते।
- **प्राधिकारिता सूत्रम्** – यथा प्रजातन्त्रे शासनं सर्वे कुर्वन्ति तथैव सर्वेषां प्राधिकारं भवति येन सर्वे स्व-स्वसमाजस्य मूल्यनिर्धारणे भागग्रहीतारः भवन्ति।

भगवद्गीतायाः दर्शनस्तु आदर्शवादमेव अङ्गीकरोति। अस्य मतानुसारं मूल्यज्ञानं तु वस्तुनिष्ठमेव भवति परन्तु सर्वे स्व-स्वसंज्ञानानुगुणं निश्चितानां मूल्यानां प्रतिपादनं कुर्वन्ति। अतः एव भारतीयदर्शने विभिन्नमूलग्रन्थानां विभिन्नप्रकारकानि व्याख्यानानि लभ्यन्ते। भगवद्गीतायाः श्लोकः एकः कर्मणां निर्धारणापेक्षया यथाक्रमस्वीकरणं, कर्मणि अकर्मभावं, कर्मणि नियन्त्रणराहित्यं, स्वस्याभावेऽपि क्रियासिद्धित्वञ्च प्रतिपादयति, यथा –

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।

स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥

**मूल्यपरम्परा** – काण्ट् महोदयस्य मूल्यपरम्परायाः परिगणनं उद्देश्याधारितेषु एव भवति यत्र सः कर्मणः पार्श्वद्वयं वदति तद्यथा आत्मपरिपूर्णता, समाजसन्तृप्तिश्च। आत्मपरिपूर्णतापि द्विविधं भवति यथा प्राकृतिकपरिपूर्णता यत्र कौशलानां, बुद्धेः, क्षमतानाञ्च विकसनं चिन्त्यते तथैव नैतिकपरिपूर्णता यत्र आत्मनः मूलभूतानां नैतिकावश्यकतानां यथा आनन्दं, सन्तृप्तिः इत्यादिनां चिन्तनं भवति। मूल्यपरम्परा भगवद्गीतायां विस्तृतम् उत्तमादर्शैः परिकल्पितञ्च अस्ति। जनकादीनां उदाहरणं दत्वा कृष्णः वदति यत् कर्मणैव एते संसिद्धिं प्राप्तवन्तः इति। सामाजिकरूपेण जनानां मार्गदर्शनमपि कारयितव्यं भवति। यदा अत्र मूल्यानां क्षतिः भवति चेत् तदा स्वयं भगवता कर्मनिर्लिप्तेनैव कर्म कृत्वा दर्शनीयं भवतीति वदति –

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।

नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥

यदि ह्यहं न वर्तेयं जातुकर्मण्यतन्द्रितः।

मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥

अनेन ज्ञायते यत् समाजे मूल्यानां नियमने उत्तमादर्शानां अपेक्षा अस्ति एव इति। केवलं संज्ञानेन मूल्यानां निर्धारणे कर्मणां निश्चयने वा मानवः समर्थः न भवति। उत्तमसमाजस्य निर्माणार्थं योग्यादर्शानां प्रतिपुष्टीनां सर्वदा अपेक्षा भवत्येव।

**पारलौकिकादर्शवादः** (Transcendental Idealism) – एतदेकं दार्शनिकोपागमः अस्ति यत्र ऐन्द्रिकसाक्ष्याणां परिगणनं भवति येषाम् अवगमने मनसः आन्तरिकांशानां सञ्चालनमपेक्षते। काण्ट् अनुसारं समयः आकाशश्च वैज्ञानिकरूपेण नैजांशौ स्तः तथैव पारलौकिके आदर्शपूर्णौ च। व्यक्तिनिष्ठरूपेण समाजस्य सम्पूर्णतया संज्ञानं कर्तुं न शक्यते यतोऽहि संज्ञानं मानवानां स्वेन्द्रियाणां क्षमतायाः आधारेण परिगणितं भवति। भगवद्गीतायां तु पारलौकिकसत्तायाः एव

प्रतिपादनमस्ति यत्र भगवतः प्राधिकारित्वं स्वीकृतमस्ति। भगवान् एव स्वयमत्र पारलौकिकक्षमतान् निर्माय तत्र मानवान् प्रेरयति च। पारलौकिकक्षमतानामाधारेण मानवः स्वेन्द्रियाणामुपरि नियन्त्रणं प्राप्य कर्मबन्धनात् विनिर्मुक्तो भूत्वा मोक्षं साधयेत् इति उपवर्णितमस्ति। तत्र श्लोकमस्ति यथा –

श्रद्धावान् लभते ज्ञानं मत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥

**कर्मविज्ञानम्** (Deontology) – काण्ट् महोदयस्य कर्मसिद्धान्तस्तु साक्षात् कर्मणः महत्त्वं सूचयति। कर्मणः पालनं कर्मार्थमेव भवेत् तथैव तस्य नैतिकाधारः स्यादिति। यदि कर्तव्यमिति विचिन्त्य कार्यं करोति चेदेव तत्र विशेषतया नैतिकतायाः अनुभूतिः प्राप्यते। लक्ष्याणां वा विभिन्नोद्देश्यानां वा आधारेण कर्मणाम् अनुपालनं भवति चेत् तत्र मानवेन प्राप्यमाणानां स्वार्थानामेव चिन्तनं भवति न तु नैतिकतायाः इति। भगवद्गीतायां तु कर्मविचाराः संसारबन्धनस्साकं सम्बन्धिताः भवन्ति अतः तेषां निवारणेन मोक्षः इति तु न चिन्तनीयं कर्मणां परिपालनेनैव मोक्षः अस्ति परन्तु तत्र कर्मणां परिपालने कर्म प्रति लोभः न भवेत्। कर्मणः फलान्वेषणं त्यक्त्वा परतन्त्रभावनया दैवाधीनं सर्वमिति प्रवृत्तिः भवेदिति सूचयति। तत्र श्लोकः यथा –क्

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।
यज्ञायाऽचरतः कर्म समग्रं प्रविलीयते॥

**उत्तमाशयः** (Good Will) – काण्ट् महोदयस्य दृष्ट्या उत्तमाशयः नाम ये निर्णयाः पूर्णतया नैतिकापेक्षाभिः अथवा नैतिकनियमैः निर्धारिताः भवन्ति। मनुष्येषु अनिवार्यतया एतत् नियमं स्वस्य स्वाभाविककामनानां बाध्यतानाञ्च अनुभवार्थं भवति, अतः एव एतादृशाः नियमाः मनुष्येषु प्रयुक्ताः अनिवार्याः कर्तव्याश्च सन्ति। एतदाधारेणैव काण्ट् महोदयानुसारं कर्मणाम् आयोजनं भवति। भगवद्गीतायां कर्मणां निश्चयार्थम् उत्तमाशयानां प्रस्तुतिः आदर्शैः प्रतिपादितं भवति। भगवद्गीतायाः उत्तमाशयं सम्पूर्णतया दैवाधीनं भवति। यथा –

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना॥

अस्य आशयः अस्ति यत् सर्वं भगवताधीनमिति यथा व्यक्तेः जीवनस्य कर्मणां नियोजनं भगवता क्रीयते, कर्मणां नियोजने स्रोतांसि भगवतः अस्ति, कर्मणां फलानुभवी च भगवानेव अस्ति, भगवता एव कार्यान्वयनं भवति, सर्वं भगवताधीनमिति च विवृतमस्ति। एवं रूपेण कर्मणां विषये चिन्तयित्वा कार्यप्रवृत्ताः भवन्ति चेत् तत्कर्म नैतिकं मोक्षदायकञ्च भवतीति स्पष्टीक्रीयते।

अत्र एकैकशः मतानां परिचयः, कर्माचरणप्रक्रिया, स्वतन्त्रतायाः सम्प्रत्ययाः, आज्ञापनप्रकारान्, मूल्यपरम्परायाः, पारलौकिकांशानां, कर्म एव सिद्धान्तत्त्वेन परिगणनानि, उत्तमाशयाणां परिचिन्तनानि च क्रमशः चिन्तितानि। अनेन उभयोः मध्ये विद्यमानाः सामान्यभेदाः समानताश्च ज्ञाताः, येन अग्रे उपयुक्तदर्शनेषु योग्यरूपेण बहुविषयकोपागमत्वेन अध्ययनं विधातुं शोधकर्तारः प्रभवन्ति। उभयोः विषययोः मध्ये तुलनात्मकाध्ययनेन ज्ञानक्षेत्राणां परस्परान्तर्सम्बन्धः वर्धते। अनेन अनुसन्धानेन पारम्परिकच्छात्राः पाश्चत्यस्य काण्ट् मतस्य एवं आधुनिकच्छात्राः भगवद्गीतायाः विषये अवगमनात्मकं ज्ञानं प्राप्तुं शक्नुवन्ति। न केवलं अन्तर्सम्बन्धकल्पनं विविधविषयाणां अन्यैः साकं तुलनेन विषयाः विस्तारं प्राप्नुवन्ति अर्थात् विषयान्तर्गताः नूतनायामाः परिचर्चिताः भवन्ति, यथा अत्र अनुसन्धाने एव भगवद्गीतायाः मतं वस्तुनिष्ठं वा व्यक्तिनिष्ठं वा इति परिचर्चा विहिता आसीत्, एतादृशपरिचर्चाः पारम्परिकपद्धतौ नासीत् आधुनिकाः ज्ञानस्य स्वरूपमपि स्पष्टीकर्तुम् इच्छन्ति, यत् स्पष्टीकरणस्य अपेक्षा पूर्वं नासीत् परन्तु इदानीन्तनकाले अवगमनार्थम् एवं स्पष्टीकरणम् अत्यनिवार्यं भवति। इत्थं काण्ट् महोदयेन स्वनैतिकसिद्धान्ते प्रतिपादितानां प्रमुखांशानां सामन्यतया परिचयं कारयित्वा एकैकस्य भगवद्गीतायाः साकं तुलना च कृत्वा इदमनुसन्धानात्मकप्रबन्धम् अत्र समाप्तिमेति।

**निष्कर्षः** (Conclusion)

अनेन काण्ट् कर्मविज्ञानस्य भगवद्गीतायाः कर्मसिद्धान्तस्य च तुलनात्मकाध्ययनेन निष्पादिताः निष्कर्षाः अधोलिखिताः सन्ति। तद्यथा –

## समानता

- दर्शनजगति उभयोः काण्ट् कर्मविज्ञानस्य भगवद्गीतायाः कर्मसिद्धान्तस्य च नैतिकांशानां प्रतिपादने बहुप्रमुखानि योगदानानि सन्ति।
- उभयत्र कर्माचरणे समानता दृश्यते यथा नैतिकतां प्रतिपादयितुं उभयत्रापि कर्मस्योपरि एव अधिकं बलं दत्तमस्ति।
- यद्यपि उभयत्र स्वातन्त्र्यस्य अर्थग्रहणे भेदः अस्ति परन्त्वपि आदर्शांशाः अपि काण्ट् महोदयस्य स्वातन्त्र्यांशान् न धिक्करोति च। सामाजिकरूपेण स्वातन्त्र्यस्य परिगणने नैतिकतायाः पुष्टिः उभयत्र अङ्गीकृतमेव अस्ति।
- काण्ट् महोदयः वर्गीयाज्ञापनानां प्रतिपादने वैश्वीकरणनियमावलीन् अङ्गीकरोति येन तार्किकरूपेण वा वस्तुनिष्ठता अङ्गीकृतोऽस्ति यत् आदर्शाः भगवद्गीतयाः कर्मसिद्धान्तस्य प्रमुखस्रोताः भवन्ति। तार्किकप्रयोगैरपि आदर्शानां निर्माणं भवति।
- मूल्यपरम्परायाः परिचर्चायां ज्ञायते यत् उभौ सिद्धान्तौ आत्मपरिपूर्णतायाः उपरि एकं चिन्तनं विधास्यन्तीति।
- उभयत्र पारलौकिकादर्शानां स्वीकृतिः दृश्यते। सर्वे अंशाः ग्रहणार्थम् उपलब्धाः न भवन्ति। अतः उभयत्रापि इन्द्रियाभिः अतिरिक्तस्य विशिष्टस्य कश्चनांशस्य परिगणनं दृश्यते।
- काण्ट् सिद्धान्ते गीतायाः कर्मसिद्धान्ते च कर्मकरणे उद्देश्यं फलानपेक्षितं कर्मकेन्द्रितमेव अस्ति।
- उभयत्र विशेषेण उत्तमोत्तमाशयानां परिचर्चा लभ्यते यत् कर्माचरणे उपयुक्ताः भवन्ति।

## भेदाः

- काण्ट् महोदयस्य कर्मविज्ञानं पाश्चात्यमतेषु आधुनिकमतेषु च परिगण्यते। अन्यत्र भगवद्गीता तु भारतीयदर्शनस्य प्रमुखं ज्ञानस्रोतमस्ति यत् विभिन्नेषु दार्शनिकमाध्यात्मिकञ्च तत्वेषु उत्तमांशान् प्रतिपादयति।
- उभयत्रापि कर्माचरणे प्रमुखं भेदमस्ति यत् काण्ट् मतानुसारेण कर्मणः आचरणे शुद्धतर्कनस्य संज्ञानस्य च उपयोगः भवति। परन्तु गीतामते तु कर्मस्याचरणे वस्तुनिष्ठानां पूर्वजैः अनुसृतानां नीतीनां प्रयोगः भवति।
- काण्ट् महोदयस्य कर्मविज्ञाने स्वतन्त्रतायाः परिगणनं लौकिकरूपेण सामाजिकप्रक्रियाणां सञ्चालनस्य चिन्तने भवति। भगवद्गीतायां स्वातन्त्र्यमिति आध्यात्मिकतत्वं भवति यत् मोक्षेणैव साध्यं भवति। समाजे कदापि कोऽपि स्वतन्त्रः भवितुं न शक्नोति।
- काण्ट् महोदयः आज्ञापनान् सामाजिकवर्गेषु विभज्य प्रतिपादयति। गीतायां तु आदर्शवादः एव अनुसर्यते यत् प्राक्कल्पिताज्ञापनान् अङ्गीकरोति।
- उभयोः मूल्यपरम्परा भिन्नमस्ति, काण्ट् मते मूल्यपरम्परा नाम आत्मपरिपूर्णता, समाजसन्तृप्तिश्च भवति। परन्तु मुमुक्षूणाम् आदर्शाः गीतायां प्रमुखत्वं वहति।
- काण्ट् मते पारलौकिकादर्शवादस्य सारं भवति यत्र संज्ञाने एव दार्शनिकोपागमत्वेन आन्तरिकांशानां स्वीकृतेः प्रदर्शनं भवति। गीतायां तु पारलौकिकतत्वानां परिगणनम् इतोऽपि अग्रे विचिन्त्य दैविकतत्त्वानामपि पर्यालोचनं दृश्यते।
- कर्म विज्ञानत्वेन पश्यति काण्ट् महोदयः यत्र संज्ञानात्मकतर्कनस्य महत्त्वमस्ति, परन्तु गीतायाः मते तु आध्यात्मिकरूपेण कर्मणः चिन्तनं विधास्यते।
- उत्तमाशयाणां परिकल्पने, काण्ट् महोदयः तर्कने अस्य उपयोगं दर्शयति। भगवद्गीतायाः मते तु उत्तमाशयं नाम कर्माचरणे भक्तिभावेन मोहविनिर्मुक्तम् आत्मसमर्पणं भवति।

## सन्दर्भ


1. Dhoj Gambhir, Kant's concept of imperative critical analysis, Shodhganga, 2021.
2. Peter John, MPYE002 Ethics, Indira Gandhi Open National University, 2003, New Delhi.
3. Bannanje Govindacharya, Bhagavantana nalnudi, Eeshaavasya pratisthana, 2010, Udupi.
4. Gosh Pragathi, Similarities and Differences between Bhagavadgeeta and Kant's Philosophy, Shareyouressays.com.
5. Sinha Jadunath, A Manual of Ethics, 4th Edition, New Central Book Agency, 2017, India.
6. Peter John, MPY001 Indian Philosophy, Indira Gandhi Open National University, 2003, New Delhi.